# संस्कृतवार्ता:

**दिनाङ्क :-11.09.2024**

**प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमंत्री-सेमिकॉनिति

प्रधानमन्त्री नरेन्द्रमोदी अद्य ग्रेटरनोएडा इत्यत्र चतुर्विंशत्युत्तरद्विसहस्रतमवर्षस्य सेमीकॉनइण्डिया इत्यस्य कार्यक्रमस्य शुभारम्भं करिष्यति। कार्यक्रमास्यास्य विषयो वर्तते- **शेपिंग द सेमीकण्डक्टर फ्यूचर** इति अर्धचालकभविष्याय आकृतिप्रदानमिति। एतस्मिन् कार्यक्रमे भारतस्य अर्धचालक-रणनीतिं प्रदर्शयिष्यते। या हि भारतं वैश्विककेन्द्रं परिकल्पयति। ह्य: निजावासे प्रधानमन्त्री अवोचत् यत् भारतस्य पार्श्वे वैविध्ययुताया: अर्धचालकापूर्ति-श्रृङ्खलाया: क्षमता विद्यमानास्ति। अपि च लोकतन्त्र-प्रौद्योगिक-इत्युभाभ्यां मानवकल्याणं सुनिश्चितमस्ति।

### प्रधानमन्त्री- अनुसन्धानम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना वैश्विकसमस्यानां स्थानीयसमाधानस्य विषये अवधानं दत्तम्। ह्य: नवदिल्ल्यां नवनिर्मितस्य अनुसन्धान-राष्ट्रिय-अनुसन्धान-प्रतिष्ठिका इत्यस्य प्रथमाया: शासी-मण्डल-सभायाः अध्यक्षता प्रधानमन्त्रिणा कृता। सभायां प्रधानमन्त्रिणा अनुसंधानव्यवस्थायाः मार्गस्य बाधकान् चिन्वन्तु तथा च एतेषां समस्यानां निवारणार्थं उपायान् कर्तुम् आदिष्टम्। सः अवदत् यत् विद्यमानानां समस्यानां नूतनानि समाधानानि अन्वेष्टुं संशोधनं केन्द्रितम् भवेत् इति। संस्थानां उन्नयनस्य, मानकीकरणस्य च आह्वानम्, प्रधानमन्त्रिणा सूचितम् ।

### विदेशमन्त्री-जयशङ्कर:

विदेशमन्त्री सुब्रह्मण्यम्-जयशङ्कर: जर्मनीदेशीयेन स्वसमकक्षेण एनालेनाबेयबॉक इत्यनेन सह बर्लिननगरे सम्वादं कृतवान्। एतौ नेतारौ व्यापार-निवेश-सतत-विकासाय ध्यानं प्रदत्तवन्तौ। एकस्मिन् अन्ये च कार्यक्रमे विदेशमन्त्री डॉ. एस्. जयशङ्कर: भारत-जर्मनी-देशयोर्मध्ये सम्भाव्यमानाय रक्षासहयोगाय आह्वानं कृतवान्। अपि च यूरोपीयराष्ट्रत: निर्यात-नियन्त्रणं

सरलीकर्तुमपि आग्रहम् अकरोत्। बर्लिननगरे जर्मन-विदेश-कार्यालयस्य वार्षिक-राजदूत-सम्मेलनं सम्बोधयता विदेशमन्त्रिणा प्रोदीरितं यत् रक्षासहायतायै अधिकं विचारं करणीयं यतो हि भारतीया: अपि एतस्मिन् क्षेत्रे विस्तारं वाञ्छन्ति।

**एशियाप्रशान्तसम्मेलनम्**

नागरिकोड्डयनमिति विषयम् अवलम्ब्य द्वितीयम् एशिया-प्रशान्त-मन्त्रिस्तरीय-सम्मेलनमद्य नवदिल्ल्या: भारतमण्डपमइत्यत्र समारप्स्यते। अस्य द्विदिवसीयस्य कार्यक्रमस्यायोजनम् अन्ताराष्ट्रिय-नागरिकोड्डयन-सङ्घटन-नागरिकोड्डयनमन्त्रालययो: संयुक्ततत्वाधाने क्रियते। ध्यातव्यमस्ति यत् भारतं विश्वे द्रुतगत्या संवर्धमाना विमानविपणि:, वर्तमानसमये च दैशिक-क्षेत्रे तृतीय-स्थाने दृश्यते इति।

**भारतम्-संयुक्तारबामीरात:**

भारत-संयुक्तारबामीरातदेशौ अबूधाबीराजधान्या: युवराज्ञ: शेख-खालिद-बिन-मोहम्मद-बिन-जायद-अल-नाह्यान- इत्यस्य मुम्बय्या: यात्रावसरे व्यापार-सम्बद्धे परिणा◌ामद्वये सहमतौ जातौ। येषु भारत-संयुक्तारबामीरातयो: आभासिय-व्यापार-वीथी सम्मिलितास्ति। या हि भारत-मध्य-पूर्वीय-यूरोपस्य आर्थिकवीथौ भारत-संयुक्तारबामीरातदेशयोर्मध्ये जातस्या: सहभागिताया: अन्तर्गतं विद्यते। द्वितीयं च आकरजापूर्तिश्रृङ्खलायां नैकै: उद्यमै: सह सहभागिता इति

**हरियाणा विधानसभा निर्वाचनम्**

हरियाणाराज्ये आगामिने विधानसभा-निर्वाचनाय नवति आसनेभ्यः प्रायशः पञ्चत्रिंशदधिकैकशतं यावत् प्रत्याशिभिः नामाङ्कनपत्रं प्रपूरितम्। एषा नामाङ्कन प्रक्रिया मासस्यास्य द्वादश-दिनाङ्कपर्यन्तं प्रचलिष्यति। भाजपेतिदलेन साम्प्रतं यावत् सप्तषष्टिः प्रत्याशिनां नामानि घोषितानि। अपरत्र काँग्रेसदलेनापि अधुना यावत् एकचत्वारिंशत् प्रत्याशिनां सूची प्रसारिता।

**हॉकी-प्रतिस्पर्धा**

हॉकी इत्येतस्यां प्रतिस्पर्धायां पुरुषाणां एशियन्-चैम्पियनशिप-ट्रॉफी इति प्रतियोगितायाम् अद्य चीनदेशे भारतदेश: गतवर्षस्य अस्या: एव प्रतिस्पर्धाया: उप-विजेत्रा मलेशियादेशेन सह योत्स्यते।

**।।इति वार्ता:।।**